# Shri Tyagarajadashaka Stuti

# શ્રીત્યાગરાજદશકસ્તુતિઃ

## Document Information

Text title : Shri Tyagarajadashaka Stuti

File name : tyAgarAjadashakastutiH.itx

Category : shiva, dashaka, stuti

Location : doc_shiva

Author : shrImUlayogIndra

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીત્યાગરાજદશકસ્તુતિઃ

નીલકન્ધર ભાલલોચન બાલચન્દ્રશિરોમણે
કાલકાલ કપાલમાલ હિમાલયાચલજાપતે ।
શૂલદોર્ધર મૂલશઙ્કર મૂલયોગિવરસ્તુત
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૧॥

હારકુણ્ડલમૌલિકઙ્કણ કિઙ્કિણીકૃતપન્નગ
વીરખડ્ગ કુબેરમિત્ર કલત્રપુત્રસમાવૃત ।
નારદાદિ મુનીન્દ્રસન્નુત નાગચર્મકૃતામ્બર
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૨॥

ભૂતનાથ પુરાન્તકાતુલ ભુક્તિમુક્તિસુખપ્રદ
શીતલામૃતમન્દમારુત સેવ્યદિવ્યકલેવર ।
લોકનાયક પાકશાસન શોકવારણ કારણ
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૩॥

શુદ્ધમદ્દલતાલકાહલશઙ્ખદિવ્યરવપ્રિય
નૃત્તગીતરસજ્ઞ નિત્યસુગન્ધિગૌરશરીર ભો ।
ચારુહાર સુરાસુરાધિપપૂજનીયપદામ્બુજ
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૪॥

ઘોરમોહમહાન્ધકારદિવાકરાખિલશોકહન્
એકનાયક પાકશાસનપૂજિતાઙ્ઘ્રિસરોરુહ ।
પાપતૂલહુતાશનાખિલલોકજન્મસુપૂજિત
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૫॥

સર્પરાજવિભૂષ ચિન્મય હૃત્સભેશ સદાશિવ
નન્દિભૃઙ્ગિગણેશવન્દિતસુન્દરાઙ્ઘ્રિસરોરુહ ।
વેદશેખરસૌધસુગ્રહ નાદરૂપ દયાકર
ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૬॥

પઙ્કજાસનસૂત વેદતુરઙ્ગ મેરુશરાસન
    ભાનુચન્દ્રરથાઙ્ગ ભૂરથ શેષશાયિશિલીમુખ ।
મન્દહાસખિલીકૃતત્રિપુરાન્તકૃદ્ બડવાનલ
    ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૭॥

દિવ્યરત્નમહાસનાશય મેરુતુલ્યમહારથ
    છત્રચામરબર્હિબર્હસમૂહ દિવ્યશિરોમણે ।
નિત્યશુદ્ધ મહાવૃષધ્વજ નિર્વિકલ્પ નિરઞ્જન
    ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિ મામ્ ॥ ૮॥

સર્વલોકવિમોહનાસ્પદતત્પદાર્થ જગત્પતે
    શક્તિવિગ્રહ ભક્તદૂત સુવર્ણવર્ણ વિભૂતિમન્ ।
પાવકેન્દુદિવાકરાક્ષ પરાત્પરામિતકીર્તિમન્
    ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિમામ્ ॥ ૯॥

તાત મત્કૃતપાપવારણસિંહ દક્ષભયઙ્કર
    દારુકાવનતાપસાધિપસુન્દરીજનમોહક ।
વ્યાઘ્રપાદપતઞ્જલિસ્તુત સાર્ધચન્દ્ર સશૈલજ
    ત્યાગરાજ દયાનિધે કમલાપુરીશ્વર પાહિમામ્ ॥ ૧૦॥

શ્રીમૂલાભિધયોગિવર્યરચિતાં શ્રીત્યાગરાજસ્તુતિં
    નિત્યં યઃ પઠતિ પ્રદોષસમયે પ્રાતર્મુહુસ્સાદરમ્ ।
સોમાસ્કન્દકૃપાવલોકનવશાદિષ્ટાનિહાપ્વાઽન્તિમે
    કૈલાસે પરમે સુધામ્નિ રમતે પત્યા શિવાયાઃસુધીઃ ॥ ૧૧॥

ઇતિ શ્રી શ્રીમૂલયોગીન્દ્રકૃતા ત્યાગરાજદશકસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Tyagarajadashaka Stuti*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*